# Mangalashtakam

# मङ्गलाष्टकम्

## Document Information

Text title : Mangala Ashtakam 2

File name : mangalAShTakam2.itx

Category : deities_misc, mangala, aShTaka

Location : doc_deities_misc

Author : Kalidasa

Transliterated by : P. R. Ramamurthy

Proofread by : P. R. Ramamurthy

Acknowledge-Permission: lalitaalaalitah http://stotram.lalitaalaalitah.com

Latest update : March 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# मङ्गलाष्टकम्

श्रीमत्पङ्कजविष्टरौ हरिहरौ वायुर्महेन्द्रोऽनलः
चन्द्रो भास्करवित्तपालवरुणाः धर्माधिराजो ग्रहाः ।
प्रद्युम्नो नलकूबरः सुरगजः चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरस्तु लाङ्गलधरः कुर्वन्तु नो मङ्गलम् ॥ १॥

गौरी श्रीरदितिश्च कद्रु सुभगा भूतिः सुपर्णी शुभा
सावित्री तु सरस्वती वसुमती द्रौपद्यहल्या सती ।
स्वाहा जाम्बवती सुरुक्ममभगिनी दुःस्वप्नविध्वंसिनी
वेला चाम्बुनिधेः सुमीनमकरा  कुर्वन्तु नो मङ्गलम् ॥ २॥

नेत्राणां त्रितयं शिवं पशुपतेरग्नित्रयं पावनं
यत्तद्विष्णुपदत्रयं त्रिभुवनं ख्यातं च रामत्रयम् ।
गङ्गावाहपथत्रयं सुविमलं वेदत्रयं ब्राह्मणं
सन्ध्यानां त्रितयं द्विजैः सुविहितं कुर्वन्तु नो मङ्गलम् ॥ ३॥

अश्वत्थो वटवृक्षः चन्दनतरुः मन्दारकल्पद्रुमौ
जम्बूनिम्बकदम्बचूतलरलाः वृक्षाश्च ये क्षीरिणः ।
सर्वे ते फलसंयुताः प्रतिदिनं विभ्राजनं राजते
रम्यं चैत्ररथं च नन्दनवनं कुर्वन्तु नो मङ्गलम् ॥ ४॥

वाल्मीकिः सनकः सनन्दनतरू व्यासो वसिष्ठो भृगुः
जाबालिर्जमदग्निकच्छजनकाः गर्गोऽङ्गिरा गौतमः ।
मान्धाता ऋतुपर्णवैनसगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु नो मङ्गलम् ॥ ५॥

ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यश्च चक्षुष्पतिः
शक्रो देवपतिर्यमः पितृपतिः स्कन्दश्च सेनापतिः ।
यक्षो वित्तपतिः हरिश्च जगतां वायुः पतिः प्राणिनां
इत्येते पतयः समेत्य सततं कुर्वन्तु नो मङ्गलम् ॥ ६॥

गङ्गा सिन्धु सरस्वती च यमुना  गोदावरी नर्मदा
    कावेरी सरयूर्महेन्द्रतनया चर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
    पूर्णा पूर्णजलैः समुद्रसहिताः कुर्वन्तु नो मङ्गलम् ॥ ७॥

लक्ष्मी कौस्तुभपारिजातकुसुमाः धन्वन्तरिश्चन्द्रमाः
    गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः शङ्खो विषं चाम्बुधेः
    रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥ ८॥

इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसनं
    पुण्यं सम्प्रति कालिदासकविना विप्रप्रबन्धीकृतम् ।
यः प्रातः शृणुयात् समाहितमनाः नित्यं पठेत् भक्तिमान्
    गङ्गासागरसङ्गमे प्रतिदिनं प्राप्नोत्यसौ मङ्गलम् ॥ ९॥

इति कालिदासविरचितं मङ्गलाष्टकं सम्पूर्णम् ।

*Mangalashtakam*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*